॥ શ્રીમદ્ભાગવતાન્તર્ગતં વેણુગીતમ્ ॥

.. Venugita from Shrimadbhagavatam ..

sanskritdocuments.org

September 11, 2017

# .. Venugita from Shrimadbhagavatam ..

# ॥ શ્રીમદ્ભાગવતાન્તર્ગતં વેણુગીતમ્ ॥

## Sanskrit Document Information


Text title : shrimadbhAgavatAntargataM veNugIta

File name : veNugIta.itx

Category : gItam, giitaa, vyAsa

Location : doc_giitaa

Author : maharShi vyAsa

Description-comments : Bhagavatam skanda 10 adhyAya 21

Latest update : November 17, 2012

Send corrections to : Sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**



September 11, 2017

*sanskritdocuments.org*

શ્રીશુક ઉવાચ ।
ઇત્થં શરત્સ્વચ્છજલં પદ્માકરસુગન્ધિના ।
ન્યવિશદ્વાયુના વાતં સ ગોગોપાલકોઽચ્યુતઃ ॥ ૧૦.૨૧.૧॥

કુસુમિતવનરાજિશુષ્મિભૃઙ્ગ દ્વિજકુલઘુષ્ટસરઃસરિન્મહીધ્રમ્ ।
મધુપતિરવગાહ્ય ચારયન્ગાઃ સહપશુપાલબલશ્ચુકૂજ વેણુમ્ ॥ ૧૦.૨૧.૨॥

તદ્વ્રજસ્ત્રિય આશ્રુત્ય વેણુગીતં સ્મરોદયમ્ ।
કાશ્ચિત્પરોક્ષં કૃષ્ણસ્ય સ્વસખીભ્યોઽન્વવર્ણયન્ ॥ ૧૦.૨૧.૩॥

તદ્વર્ણયિતુમારબ્ધાઃ સ્મરન્ત્યઃ કૃષ્ણચેષ્ટિતમ્ ।
નાશકન્સ્મરવેગેન વિક્ષિપ્તમનસો નૃપ ॥ ૧૦.૨૧.૪॥

બર્હાપીડં નટવરવપુઃ કર્ણયોઃ કર્ણિકારં
બિભ્રદ્વાસઃ કનકકપિશં વૈજયન્તીં ચ માલામ્ ।
રન્ધ્રાન્વેણોરધરસુધયાપૂરયન્ગોપવૃન્દૈર્-
વૃન્દારણ્યં સ્વપદરમણં પ્રાવિશદ્ગીતકીર્તિઃ ॥ ૧૦.૨૧.૫॥

ઇતિ વેણુરવં રાજન્ સર્વભૂતમનોહરમ્ ।
શ્રુત્વા વ્રજસ્ત્રિયઃ સર્વા વર્ણયન્ત્યોઽભિરેભિરે ॥ ૧૦.૨૧.૬॥

શ્રીગોપ્ય ઊચુઃ ।
અક્ષણ્વતાં ફલમિદં ન પરં વિદામઃ
સખ્યઃ પશૂનનવિવેશયતોર્વયસ્યૈઃ ।
વક્ત્રં વ્રજેશસુતયોરનવેણુજુષ્ટં
યૈર્વા નિપીતમનુરક્તકટાક્ષમોક્ષમ્ ॥ ૧૦.૨૧.૭॥

ચૂતપ્રવાલબર્હસ્તબકોત્પલાબ્જ માલાનુપૃક્તપરિધાનવિચિત્રવેશૌ
મધ્યે વિરેજતુરલં પશુપાલગોષ્ઠ્યાં રઙ્ગે યથા નટવરૌ ક્વચ ગાયમાનૌ  ॥ ૧૦.૨૧.૮॥

ગોપ્યઃ કિમાચરદયં કુશલં સ્મ વેણુર્-
દામોદરાધરસુધામપિ ગોપિકાનામ્
ભુઙ્ક્તે સ્વયં યદવશિષ્ટરસં હ્રદિન્યો
હૃષ્યત્ત્વચોઽશ્રુ મુમુચુસ્તરવો યથાર્યઃ ॥ ૧૦.૨૧.૯॥

વૃન્દાવનં સખિ ભુવો વિતનોતિ કીર્તિં
યદ્દેવકીસુતપદામ્બુજલબ્ધલક્ષ્મિ ।

ગોવિન્દવેણુમનુ મત્તમયૂરનૃત્યં
પ્રેક્ષ્યાદ્રિસાન્વવરતાન્યસમસ્તસત્ત્વમ્ ॥ ૧૦.૨૧.૧૦॥

ધન્યાઃ સ્મ મૂઢગતયોઽપિ હરિણ્ય એતા
યા નન્દનન્દનમુપાત્તવિચિત્રવેશમ્ ।
આકર્ણ્ય વેણુરણિતં સહકૃષ્ણસારાઃ
પૂજાં દધુર્વિરચિતાં પ્રણયાવલોકૈઃ ॥ ૧૦.૨૧.૧૧॥

કૃષ્ણં નિરીક્ષ્ય વનિતોત્સવરૂપશીલં
શ્રુત્વા ચ તત્ક્વણિતવેણુવિવિક્તગીતમ્ ।
દેવ્યો વિમાનગતયઃ સ્મરનુન્નસારા
ભ્રશ્યત્પ્રસૂનકબરા મુમુહુર્વિનીવ્યઃ ॥ ૧૦.૨૧.૧૨॥

ગાવશ્ચ કૃષ્ણમુખનિર્ગતવેણુગીત
પીયૂષમુત્તભિતકર્ણપુટૈઃ પિબન્ત્યઃ ।
શાવાઃ સ્નુતસ્તનપયઃકવલાઃ સ્મ તસ્થુર્-
ગોવિન્દમાત્મનિ દૃશાશ્રુકલાઃ સ્પૃશન્ત્યઃ ॥ ૧૦.૨૧.૧૩॥

પ્રાયો બતામ્બ વિહગા મુનયો વનેઽસ્મિન્
કૃષ્ણેક્ષિતં તદુદિતં કલવેણુગીતમ્ ।
આરુહ્ય યે દ્રુમભુજાન્રુચિરપ્રવાલાન્
શૃણ્વન્તિ મીલિતદૃશો વિગતાન્યવાચઃ ॥ ૧૦.૨૧.૧૪॥

નદ્યસ્તદા તદુપધાર્ય મુકુન્દગીતમ્
આવર્તલક્ષિતમનોભવભગ્નવેગાઃ ।
આલિઙ્ગનસ્થગિતમૂર્મિભુજૈર્મુરારેર્-
ગૃહ્ણન્તિ પાદયુગલં કમલોપહારાઃ ॥ ૧૦.૨૧.૧૫॥

દૃષ્ટ્વાતપે વ્રજપશૂન્સહ રામગોપૈઃ
સઞ્ચારયન્તમનુ વેણુમુદીરયન્તમ્ ।
પ્રેમપ્રવૃદ્ધ ઉદિતઃ કુસુમાવલીભિઃ
સખ્યુર્વ્યધાત્સ્વવપુષામ્બુદ આતપત્રમ્ ॥ ૧૦.૨૧.૧૬॥

પૂર્ણાઃ પુલિન્દ્ય ઉરુગાયપદાબ્જરાગ
શ્રીકુઙ્કુમેન દયિતાસ્તનમણ્ડિતેન ।
તદ્દર્શનસ્મરરુજસ્તૃણરૂષિતેન

લિમ્પન્ત્ય આનનકુચેષુ જહુસ્તદાધિમ્ ॥ ૧૦.૨૧.૧૭॥

હન્તાયમદ્રિરબલા હરિદાસવર્યો
યદ્રામકૃષ્ણચરણસ્પરશપ્રમોદઃ ।
માનં તનોતિ સહગોગણયોસ્તયોર્યત્
પાનીયસૂયવસકન્દરકન્દમૂલૈઃ ॥ ૧૦.૨૧.૧૮॥

ગા ગોપકૈરનુવનં નયતોરુદાર
વેણુસ્વનૈઃ કલપદૈસ્તનુભૃત્સુ સખ્યઃ ।
અસ્પન્દનં ગતિમતાં પુલકસ્તરુણાં
નિર્યોગપાશકૃતલક્ષણયોર્વિચિત્રમ્ ॥ ૧૦.૨૧.૧૯॥

એવંવિધા ભગવતો યા વૃન્દાવનચારિણઃ ।
વર્ણયન્ત્યો મિથો ગોપ્યઃ ક્રીડાસ્તન્મયતાં યયુઃ ॥ ૧૦.૨૧.૨૦॥

॥ ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
દશમસ્કન્ધે પૂર્વાર્ધે વેણુગીતં નામૈકવિંશોઽધ્યાયઃ ॥ ૧૦.૨૧॥

---

Bhagvatam skandha 10, adhyAya 21

---

.. Venugita from Shrimadbhagavatam ..

Searchable pdf was typeset using generateactualtext feature of XƎLaTeX 0.99996

on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*